## अच् प्रत्यन्ववपूर्वात् सामलोम्नः । (७५/०४३)

प्रति अनु अव इत्येवंपूर्वात् सामान्तात् लोमान्तात् च समासाद् अच् प्रत्ययो भवति । [1]प्रतिसामम् । अनुसामम् । अवसामम् । [2]प्रतिलोमम् । अनुलोमम् । अवलोमम् ।

कृष्णोदक्पाण्डुपूर्वाया भूमेरच्प्रत्ययः स्मृतः ।
गोदावर्याश्च नद्याश्च सङ्ख्याया उत्तरे यदि ॥

कृष्णभूमः । पाण्डुभूमः । उदग्भूमः । [3]पञ्चनदम् । [4]पञ्चगोदावरम् । [5]नदीभिश्च (२.२.४०/६७४) इति अव्ययीभावः । भूमेरपि सङ्ख्यापूर्वायाः [6]अच् प्रत्यय इष्यते – द्विभूमः प्रासादः । त्रिभूमः । [7]दशभूमकं सूत्रम् । अन्यत्रापि च दृश्यते – पद्मनाभः । ऊर्णनाभः । [8]दीर्घरात्रः । समरात्रः । अरात्रः । तदेतत् सर्वमिह योगविभागं कृत्वा [9]साधयन्ति ॥

## अक्ष्णोऽदर्शनात् । (७६/०४३)

[10]अच् इत्यनुवर्तते । दर्शनादन्यत्र योऽक्षिशब्दः तदन्तात्[11] अच् प्रत्ययो भवति[12] । लवणाक्षम् । [13]पुष्कराक्षम् । उपमितं व्याघ्रादिभिः (२.१.५६/७३५) इति समासः । अदर्शनात् इति किम् ? ब्राह्मणाक्षि । कथं [14]कबराक्षम्, [15]गवाक्षम् इति ? अश्वादीनां मुखप्रच्छादनार्थं बहुच्छिद्रं कबराक्षम्[16], तेनापि हि दृश्यते, गवाक्षेण च ? नैष दोषः । [17]चक्षुःपर्यायवचनो दर्शनशब्दः [18]प्राण्यङ्गवचन इहाश्रीयते ॥

## अचतुरविचतुरसुचतुरस्त्रीपुंसधेन्वनडुहर्क्सामवाङ्मनसाक्षिभ्रुवदारगवोर्वष्ठीवपदष्ठीवनक्तंदिवरात्रिंदिवाहर्दिवसरजसनिःश्रेयसपुरुषायुषद्व्यायुषत्र्यायुषर्ग्यजुषजातोक्षमहोक्षवृद्धोक्षोपशुनगोष्ठश्वाः । (७७/०४८)

अच्प्रत्ययान्ता एते [19]शब्दा निपात्यन्ते । [20]समासे व्यवस्थापि निपातनादेव प्रतिपत्तव्या । आद्यास्त्रयो बहुव्रीहयः । अदृश्यानि अविद्यमानानि वा चत्वारि यस्य [21]सोऽचतुरः । विगतानि चत्वारि यस्य स विचतुरः । शोभनानि चत्वारि यस्य [22]स सुचतुरः ।

अतः परे एकादश द्वन्द्वाः । स्त्री च पुमांश्च स्त्रीपुंसौ । इह न भवति, स्त्रियाः पुमान् इति । धेनुश्चानड्वांश्च धेन्वनडुहौ । ऋक् च साम च ऋक्सामे । वाक् च मनश्च वाङ्मनसे । अक्षि च भ्रुवौ च अक्षिभ्रुवम् ।

---

1. प्रतिसामः फ. 2. प्रतिलोमः फ. 3. पञ्चनदः क, सप्तनदम् फ. 4. सप्तगोदावरम् ड. फ. 5. नदीभिश्च नास्ति क. फ. 6. अच् नास्ति क. फ. 7. दशभूमं ब. क, दशभूमः फ. 8. दीर्घरात्रम् गणरात्रम् ब, वर्षारात्रम् क. ड. ब, गणरात्रम् क. ड. फ, वर्षरात्रः ह. 9. साधयितव्यम् ब. 10. अच् – समासः नास्ति क. 11. समासात् इत्यधिकम् ब. फ. 12. समासान्तः इत्यधिकम् ग. 13. पुष्कराक्षः फ. 14. कम्बलाक्षः फ, प्राण्यङ्गः क. 15. गवामक्षि इव इत्यधिकम् ग. 16. उच्यते इत्यधिकम् क. 17. चक्षुःपर्यायः ड. 18. प्राणिलिङ्गः 19. शब्दाः नास्ति फ. 20. समासव्यवस्थापि क. ड, समासस्य फ. 21. सो नास्ति ब. 22. स नास्ति फ.